સુંદર કાંડ નિર્ણય
(હનૂમત્પ્રતિયાનમ)
અથ સપ્તમોऽધ્યાયઃ

ઓં । રામાય શાશ્વતસુવિસ્તૃતષડ્ગુણાય સર્વેશ્વરાય સુખસારમહાર્ણવાય
।
નત્વા લિલં ઘયિષુરર્ણવમુત્પપાત નિષ્પીડ્ય તં ગિરિવરં પવનસ્ય સૂનુઃ ॥
૭.૧ ॥

ચુક્ષોભ વારિધિરનુપ્રયયૌ ચ શીઘ્રં યાદોગણૈઃ સહ તદીયબલાભિકૃષ્ટઃ ।
વૃક્ષાશ્ચ પર્વતગતાઃ પવનેન પૂર્વં ક્ષિપ્તોऽર્ણવે ગિરિરુદાગમદસ્ય હેતોઃ ॥
૭.૨ ॥

સ્યાલો હરસ્ય ગિરિપક્ષવિનાશકાલે ક્ષિપ્ત્વાऽર્ણવે સ
મરુતોર્વરિતાત્મપક્ષઃ ।
હૈમો ગિરિઃ પવનજસ્ય તુ વિશ્રમાર્થમુદ્ભિદ્ય વારિધિમવર્દ્ધદનેકસાનુઃ ॥
૭.૩ ॥

નૈવાત્ર વિશ્રમણમૈચ્ચત નિઃ શ્રમોऽસૌ નિઃ સીમપૌરુષગુણસ્ય કુતઃ
શ્રમોऽસ્ય ।
આશ્લિષ્ય પર્વતવરં સ દદર્શ ગચ્ચન દેવૈસ્તુ નાગજનનીં પ્રહિતાં વરેણ ॥
૭.૪ ॥

જિજ્ઞાસુભિર્નિજબલં તવ ભક્ષમેતુ ચદ્યત ત્વમિચ્ચસિ તદિત્ચમરોદિતાચાઃ ।
આસ્ચં પ્રવિશ્ચ સપદિ પ્રવિનિઃ સૃતોઽસ્માદ દેવાનનન્દચદ્દુત સ્વૃતમેષુ
રક્ષન ॥ ૭.૫ ॥

દૃષ્ટ્વા સુરપ્રણચિતાં બલમસ્ચ ચોગ્રં દેવાઃ પ્રતુષ્ટુવુરમું સુમનોભિવૃષ્ટ્ચા
।
તૈરાદૃતઃ પુનરસૌ વિચતૈવ ગચ્ચન ચાચાગ્રહં પ્રતિદદર્શ ચ સિં હિકાખ્ચમ ॥
૭.૬ ॥

લં કાવનાચ સકલસ્ચ ચ નિગ્રહેઽસ્ચાઃ સામર્થ્ચમપ્રતિહતં પ્રદદૌ વિધાતા ।
ચાચામવાક્ષિપદસૌ પવનાત્મજસ્ચ સોઽસ્ચાઃ શરીરમનુવિશ્ચ બિભેદ
ચાઽશુ ॥ ૭.૭ ॥

નિસ્સીમમાત્મબલમિત્ચનુદર્શચાનો હત્વૈવ તામપિ વિધાતૃવરાભિગુપ્તામ ।
લમ્બે સ લમ્બશિખરે નિપપાત લં કાપ્રાકારરૂપકગિરાવથ સંચુકોચ ॥
૭.૮ ॥

ભૂત્વા બિલાળસમિતો નિશિ તાં પુરીં ચ પ્રાપ્સ્ચન દદર્શ નિજરૂપવતીં સ
લં કામ ।
રુદ્ધોઽનચાઽશ્વથ વિજિત્ય ચ તાં સ્વમુષ્ટિપિષ્ટાં તચાઽનુમત એવ વિવેશ
લં કામ ॥ ૭.૯ ॥

માર્ગમાણો બહિશ્ચાન્તઃ સોઽશોકવનિકાતળે ।

www.yousigma.com

દદર્શ શિં શપાવૃક્ષમૂલસ્થિતરમાકૃતિમ ॥ ૭.૧૦ ॥

નરલોકવિડમ્બસ્ય જાનન રામસ્ય હૃદ્ગતમ ।
તસ્ય ચેષ્ટાનુસારેણ કૃત્વા ચેષ્ટાશ્ચ સં વિદઃ ।
તાદૃકચેષ્ટાસમેતાયા અં ગુલીયમદાત તતઃ ॥ ૭.૧૧ ॥

સીતાયા યાનિ ચૈવાઽસન્નાકૃતેસ્તાનિ સર્વશઃ ।
ભૂષણાનિ દ્વિધા ભૂત્વા તાન્યેવાઽસં સ્તથૈવ ચ ॥ ૭.૧૨ ॥

અથ ચૂળામણિં દિવ્યં દાતું રામાય સા દદૌ ।
યદ્યપ્યેતન્ન પશ્યન્તિ નિશાચરગણાસ્તુ તે ।
દ્યુલોકચારિણઃ સર્વં પશ્યન્ત્યૃષય એવ ચ ॥ ૭.૧૩ ॥

તેષાં વિડમ્બનાયૈવ દૈત્યાનાં વંચનાય ચ ।
પશ્યતાં કલિમુખ્યાનાં વિડમ્બોઽયં કૃતો ભવેત ॥ ૭.૧૪ ॥

કૃત્વા કાર્યમિદં સર્વં વિશં કઃ પવનાત્મજઃ ।
આત્માવિષ્કરણે ચિત્તં ચક્રે મતિમતાં વરઃ ॥ ૭.૧૫ ॥

અથ વનમખિલં તદ રાવણસ્યાવલુપ્ય ક્ષિતિરુહમિમમેકં વર્જયિત્વાઽશુ વીરઃ ।
રજનિચરવિનાશં કાં ક્ષમાણોઽતિવેલં મુહુરતિરવનાદી તોરણં ચાઽરુરોહ ॥ ૭.૧૬ ॥

અથાશૃણોદ દશાનનઃ કપીન્દ્રચેષ્ટિતં પરમ ।
દિદેશ કિં કરાન બહૂન કપિર્નિગૃહ્યતામિતિ ॥ ૭.૧૭ ॥

સમસ્તશો વિમૃત્યવો વરાદ્ધરસ્ય કિં કરાઃ ।
સમાસદન મહાબલમ સુરાન્તરાત્મનોઽ઼ ગજમ ॥ ૭.૧૮ ॥

અશીતિકોટિયૂથપં પુરસ્સરાષ્ટકાયુતમ ।
અનેકહેતિસં કુલં કપીન્દ્રમાવૃણોદ બલમ ॥ ૭.૧૯ ॥

સમાવૃતસ્તથાઽયુધૈઃ સ તાડિતશ્ચ તૈર્ભૃશમ ।
ચકાર તાન સમસ્તશસ્તળપ્રહારચૂર્ણિતાન ॥ ૭.૨૦ ॥

પુનશ્ચ મન્ત્રિપુત્રકાન સ રાવણપ્રચોદિતાન ।
મમર્દ સપ્ત પર્વતપ્રભાન વરાભિરક્ષિતાન ॥ ૭.૨૧ ॥

બલાગ્રગામિનસ્તથા સશર્વવાકસુગર્વિતાન ।
નિહત્ય સર્વરક્ષસાં તૃતીયભાગમક્ષિણોત ॥ ૭.૨૨ ॥

લિઽનૌપમં હરેર્બલં નિશમ્ય રાક્ષસાધિપઃ ।
કુમારમક્ષમાત્મનઃ સમં સુતં ન્યયોજયત ॥ ૭.૨૩ ॥

સ સર્વલોકસાક્ષિણઃ સુતં શરૈર્વવર્ષ હ।

શિતૈર્વરાસ્ત્રમન્ત્રિતૈર્ન ચૈનમભ્યચાલયત ॥ ૭.૨૪ ॥

સ મણ્ડમધ્યકાસુતં સમીક્ષ્ય રાવણોપમમ ।
તૃતીય એષ ચાં શકો બલસ્ય હીત્યચિન્તયત ॥ ૭.૨૫ ॥

નિધાર્ય એવ રાવણઃ સ રાઘવસ્ય નાન્યથા ।
યદીન્દ્રજિન્મયા હતો ન ચાસ્ય શક્તિરીક્ષ્યતે ॥ ૭.૨૬ ॥

અતસ્તયોઃ સમો મયા તૃતીય એષ હન્યતે ।
વિચાર્ય ચૈવમાશુ તં પદોઃ પ્રગૃહ્ય પુપ્લુવે ॥ ૭.૨૭ ॥

સ ચક્રવદ ભ્રમાતુરં વિધાય રાવણાત્મજમ ।
અપોથયદ ધરાતળે ક્ષણેન મારુતી તનુઃ ॥ ૭.૨૮ ॥

વિચૂર્ણિતે ધરાતળે નિજે સુતે સ રાવણઃ ।
નિશમ્ય શોકતાપિતસ્તદગ્રજં સમાદિશત ॥ ૭.૨૯ ॥

અથેન્દ્રજિન્મહાશરૈર્વરાસ્ત્રસમ્પ્રયોજિતૈઃ ।
તતક્ષ વાનરોત્તમં ન ચાશકદ વિચાલને ॥ ૭.૩૦ ॥

અથાસ્ત્રમુત્તમં વિધેર્યુયોજ સર્વદુષ્ષહમ ।
સ તેન તાડિતો હરિર્વ્યચિન્તયન્નિરાકુલઃ ॥ ૭.૩૧ ॥

મચા વરા વિલં ધિતા હ્યનેકશઃ સ્વચમ્ભુવઃ ।
સ માનનીચ એવ મે તતોઽત્ર માનચામ્ચહમ ॥ ૭.૩૨ ॥

ઈમે ચ કુર્યુરત્ર કિં પ્રહૃષ્ટરક્ષસાં ગણાઃ ।
ઈતીહ લક્ષ્યમેવ મે સ રાવણશ્ચ દૃશ્યતે ॥ ૭.૩૩ ॥

ઈદં સમીક્ષ્ય બદ્ધવત સ્થિતં કપીન્દ્રમાશુ તે ।
બબન્ધુરન્યપાશકૈર્જગામ ચાસ્ત્રમસ્ય તત ॥ ૭.૩૪ ॥

અથ પ્રગૃહ્ય તં કપિં સમીપમાનચં શ્ચ તે ।
નિશાચરેશ્વરસ્ય તં સ પૃષ્ટવાં શ્ચ રાવણઃ ॥ ૭.૩૫ ॥

કપે કુતોઽસિ કસ્ય વા કિમર્થમીદૃશં કૃતમ ।
ઈતીરિતઃ સ ચાવદત પ્રણમ્ય રામમીશ્વરમ ॥ ૭.૩૬ ॥

અવૈહિ દૂતમાગતં દુરન્તવિક્રમસ્ય મામ ।
રઘૂત્તમસ્ય મારુતિં કુલક્ષચે તવેશ્વરમ ॥ ૭.૩૭ ॥

ન ચેત પ્રદાસ્યસિ ત્વરન રઘૂત્તમપ્રિયાં તદા ।
સપુત્રમિત્રબાન્ધવો વિનાશમાશુ ચાસ્યસિ ॥ ૭.૩૮ ॥

ન રામબાણધારણે ક્ષમાઃ સુરેશ્વરા અપિ ।
વિરિંચિશર્વપૂર્વકાઃ કિમુ ત્વમલ્પસારકઃ ॥ ૭.૩૯ ॥

પ્રકોપિતસ્ય તસ્ય કઃ પુરસ્થિતૌ ક્ષમો ભવેત ।
સુરાસુરોરગાદિકે જગત્યચિન્ત્યકર્મણઃ ॥ ૭.૪૦ ॥

ઈતીરિતે વધોદ્યતં ન્યવારયદ વિભીષણઃ ।
સ પુચ્છદાહકર્મણિ ન્યયોજયન્નિશાચરાન ॥ ૭.૪૧ ॥

અથાસ્ય વસ્ત્રસંચયૈઃ પિધાય પુચ્છમગ્નયે ।
દદુર્દદાહ નાસ્ય તન્મરુત્સખો હુતાશનઃ ॥ ૭.૪૨ ॥

મમર્ષ સર્વચેષ્ટિતં સ રક્ષસાં નિરામયઃ ।
બલોદ્ધતશ્ચ કૌતુકાત પ્રદગ્ધુમેવ તાં પુરીમ ॥ ૭.૪૩ ॥

દદાહ ચાખિલં પુરં સ્વપુચ્છગેન વહ્નિના ।
કૃતિસ્તુ વિશ્વકર્મણોઽપ્યદહ્યતાસ્ય તેજસા ॥ ૭.૪૪ ॥

સુવર્ણરત્નકારિતાં સ રાક્ષસોત્તમૈઃ સહ ।
પ્રદહ્ય સર્વશઃ પુરીં મુદાઽન્વિતો જગર્જ ચ ॥ ૭.૪૫ ॥

સ રાવણં સપુત્રકં તૃણોપમં વિધાય ચ ।
તયોઃ પ્રપશ્યતોઃ પુરં વિધાય ભસ્મસાદ યયૌ ॥ ૭.૪૬ ॥

વિલંઘ્ય ચાર્ણવં પુનઃ સ્વજાતિભિઃ પ્રપૂજિતઃ ।

www.yousigma.com

પ્રભક્ષ્ય વાનરેશિતુર્મધુ પ્રભું સમેચિવાન ॥ ૭.૪૭ ॥

રામં સુરેશ્વરમગણ્યગુણાભિરામં સમ્પ્રાપ્ય સર્વકપિવીરવરૈઃ સમેતઃ ।
ચૂળામણિં પવનજઃ પદયોર્નિધાય સર્વાં ગકૈઃ પ્રણતિમસ્ય ચકાર ભકત્યા ॥ ૭.૪૮ ॥

રામોઽપિ નાન્યદનુદાતુમમુષ્ય યોગ્યમત્યન્તભક્તિપરમસ્ય વિલક્ષ્ય કિંચિત ।
સ્વાત્મપ્રદાનમધિકં પવનાત્મજસ્ય કુર્વન સમાશ્લિષદમું પરમાભિતુષ્ટઃ ॥ ૭.૪૯ ॥

ઈતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે
શ્રીમહાભારતતાત્પર્યનિર્ણયે
શ્રીરામચરિતે હનૂમત્પ્રતિયાનં નામ સપ્તમોઽધ્યાયઃ